Shodhshauryam, International Scientific Refereed Research Journal
© 2020 SHISRRJ | Volume 3 | Issue 5 | ISSN : 2581- 6306

# काव्य-शब्दशास्त्रयो: ध्वनिसिद्धान्तविमर्श:



रामकुमारी
अतिथि प्राध्यापिका,
महर्षि पाणिनि संस्कृत एवं वैदिक विश्वविद्यालय,
उज्जैन (मध्यप्रदेश:), भारत।

**Article Info**
Volume 3, Issue 5
Page Number: 137-144
Publication Issue :
September-October-2020

**Article History**
Accepted : 10 Oct 2020
Published : 20 Oct 2020

**सारांश:–** शब्दसाध्वसाधुप्रतिपादकं शास्त्रं शब्दशास्त्रम् आहोस्वित् पदशास्त्रम् व्याकरणशास्त्रमिति वा। साहित्यस्य काव्यस्य वा तत्त्वप्रतिपादकं शास्त्रं साहित्यशास्त्रं काव्यशास्त्रं वेत्ति। ध्वनितत्त्वविषयकविचार: न केवलं साहित्यशास्त्रे विवेचिता:, अपितु वेदाङ्गेषु, उपनिषत्सु दर्शनशास्त्रेषु च अवलोकनेन सर्वत्र दरिदृश्यते।

मुख्यशब्द:- काव्यशब्दशास्त्र:, ध्वनिसिद्धान्त:, विमर्श:।

शब्दसाध्वसाधुप्रतिपादकं शास्त्रं शब्दशास्त्रम् आहोस्वित् पदशास्त्रम् व्याकरणशास्त्रमिति वा। साहित्यस्य काव्यस्य वा तत्त्वप्रतिपादकं शास्त्रं साहित्यशास्त्रं काव्यशास्त्रं वेत्ति। ध्वनितत्त्वविषयकविचार: न केवलं साहित्यशास्त्रे विवेचिता:, अपितु वेदाङ्गेषु,उपनिषत्सु दर्शनशास्त्रेषु च अवलोकनेन सर्वत्र दरिदृश्यते। परञ्च व्याकरणशास्त्रेध्वनिविषयकविहितविचार: सर्वेषु शास्त्रेषु प्रमाणभूत:परमसिद्धान्तभूतश्च।यतो 'सर्वशास्त्रोपकारकं व्याकरणमिति'। ध्वनिप्रतिपादक: ध्वन्यालोके ध्वनित: आनन्दवर्धनाचार्य:–

**वैयाकरणा: व्याकरणमूलत्वात् सर्वविद्यानाम्।**[1]

**पदमञ्जरीकारा हरदत्तमिश्रा अप्यवोचन् -**

**उपासनीयं यत्नेन शास्त्रं व्याकरणं महत्।**

**प्रदीपभूतं सर्वासां विद्यानां यदवस्थितम्।।**[2]

**पवित्रं सर्वविद्यानामधिविद्यं प्रकाशते।**[3]

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

व्याकरणशास्त्रे न केवलं शब्दतत्त्वानि निहितानि विवेविचानि च,अपि च दार्शनिकतत्त्वानि,काव्यशास्त्रस्य प्रमेयभूता: रसोलङ्कारध्वनिसिद्धान्ता: इत्यादय: अनुसन्धेयविषया: शास्त्रीयरीत्या विवेचिता:।

**किन्नाम ध्वनिरिति?कश्च व्युत्पत्ति:?**

'ध्वनि' शब्दोऽयं 'ध्वन शब्दे' इत्यस्माद् धातो: 'खनिकष्यज्यसिवसिवनिसनिध्वनिग्रन्थिचरिभ्यश्च'[4] इति सूत्रेण 'इ' प्रत्ययेनैव सिद्धयति।

ध्वनिपदमिदम् अनेकार्थवाचकम्। तद्यथा-

1.ध्वनतीति ध्वनिरिति कर्तृव्युत्पत्त्या व्यञ्जकशब्दे।

2.ध्वन्यते इति ध्वनिरिति कर्मव्युत्पत्त्या व्यञ्जनाशक्तेर्वाचकम्।

3.ध्वननं ध्वनिरिति भावव्युत्पत्त्या रसादिप्रतीतिरर्थ:।

4. ध्वन्यतेऽस्मिन्निति ध्वनिरिति अधिकरणव्युत्पत्त्या उत्तमकाव्यमर्थ:।

**काव्यशास्त्रदृष्ट्याध्वनिविमर्श:-**

साहित्यशास्त्रे रसालङ्कारा:, रीति, ध्वनि, वक्रोक्ति, औचित्यविचारादिप्रमुखविषया: सन्तीति। काव्याभिलाषिणाम् काव्यजिज्ञासूणाञ्च कृते काव्याचार्या: वादप्रतिवादरूपेण स्वप्रतिभाकौशलै: काव्यालङ्कारादिविषया: लौकिकोदाहरणै: दृष्टान्तैश्च प्रतिपादिता:। एतेषु विषयेष्वन्यतम: विषय: अन्यतम: वाद: सिद्धान्तो वास्ति ध्वनिसिद्धान्त:। ध्वनिसिद्धान्तोऽयमतीव रमणीय:गहनीय:वर्तते।

साहित्यदर्पणे तस्य लक्षणं प्रोवाच-

**"वाच्यातिशायिनी व्यङ्ग्ये ध्वनिस्तत्काव्यमुत्तमम्"**[5]

वस्तुतस्तु ध्वनति व्यञ्जनया रसादीन् प्रत्यायतीति ध्वनि: शब्दार्थसमुदाय इत्यर्थ:।

यत्र वाच्यार्थपेक्षया व्यङ्यार्थस्याधिकचमत्कारिता,'ध्वन्यतेऽस्मिन्निति ध्वनि:' इति व्युत्पत्त्या ध्वनिर्नामोत्तमं काव्यम्।

यथा-

**कदली कदली करभ: करभ:,करिराजकर: करिराजकर:।**

**भुवनत्रितयेऽपि विभर्ति तुलामिदमूरुयुगं न चमूरुदृश:।।**

इत्यत्र द्वितीयकदल्यादिशब्दा: पौनरुक्त्यभिया सामान्यकदल्यादिरूपे मुख्यार्थे बाधिता जाड्यादिगुणविशिष्टकदल्यादिरूपमर्थं बोधयन्ति,जाड्यातिशयश्च व्यङ्ग्य:। अत्र वाच्यात् कदल्याद्यर्थ विशेषाद् अधिकचमत्कारी जाड्यातियरूपोऽर्थ:,इति ध्वनिर्नामतोत्तमम् काव्यमिदम्।

अथ च

**यत्रार्थ: शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ।**

**व्यङ्क्त: काव्यविशेष: स ध्वनिरिति सूरभि: कथित:।।**[6]

यत्र=यस्मिन् काव्ये,वाक्ये,रचनायां वा,अर्थ: शब्दो वा वाच्य: वाचको वा उपसर्जनी-कृत स्वार्थौ - उपसर्जनीकृत:=गौणीकृत:,स्वात्मा=वाचक: अर्थश्च =वाच्यश्च येन स: तमर्थम्=वाच्यभिन्नमर्थम्,

प्रतीयमानं पुनरन्यदेव इत्यनया कारिकयाऽभिहितं प्रतीयमानार्थम् व्यक्त:=प्रतीतिविषयीकृत: स=काव्यविशेष: ध्वनिरिति=ध्वनि-नामधेय:,सूरिभि:=बुधै: वैयाकरणै:,काव्यतत्त्वविद्धि:वा कथित:=अभिहित:।

स्वश्च अर्थश्च इति स्वार्थौ।वाच्यवाचकौ व्यंग्यार्थोपकारकत्वात्,गुणीकृत्य व्यंग्यार्थं बोधयत:इत्यत्र तात्पर्य: पर्यवसित:।शब्दश्चार्थश्च व्यङ्ग्यार्थ बोधयत इति ग्रन्थकर्तुराशय: स्वार्थो अप्रधानं कृत्वा इति। अप्रधानोपसर्जने इत्यमर:।

तदुक्तं साहित्यदर्पणे-

**शब्दबोध्यो व्यनक्त्यर्थ:शब्दोऽप्यर्थान्तराश्रय:।**

**एकस्य व्यञ्जकत्वे तदन्यस्य सहकारिता।।**

मम्मटाचार्यानुसारम्-

**"इदमुत्तममतिशयिनि व्यङ्ग्ये वाच्याद्ध्वनिर्बुधै: कथित:।।"**[7]

पण्डितराजजगन्नाथमतानुसारम्-

**'शब्दार्थौ यत्र गुणीभावितात्मानौ**

**कमप्यर्थमङ्कारस्तदाद्यामिति'।**[8]

'काव्यस्यात्मा ध्वनि:' इति व्यवहारादथ च **काव्यस्यात्मा च एवार्थ:**[9]।शब्दार्थशरीरन्तावत् काव्यमिति यत्र काव्यव्यवहार: प्रसिद्ध: तत्र शरीरत्वे सति तस्मिन् चैतन्यलावण्यादिप्रतीतौ काव्यस्य आत्मा अपि वक्तव्यमिति। अत एवोच्यते काव्यस्यात्मा इति।काव्यशरीरस्य आत्मतत्त्वं नाम।स एव व्यञ्जनागम्य एव अर्थ:। तदेव स्फोटयति -तथा चादिकवे: पुरा:।

**काव्यस्यात्मा स एवार्थस्तथा चादिकवे: पुरा:।**

**क्रौञ्चद्वन्द्ववियोगोत्थ: शोक: श्लोकत्वमागत:।।**[10]

पुरा आदिकविवाल्मीकि: नित्यकर्मनिवृत्तये गच्छन् केनचित् व्याधेन व्यापाद्यमान क्रौञ्चद्वन्द्वमध्ये एकं ददर्श,तदैव अपरया क्रौञ्चा वियोगजन्यकरुणस्थायिभावं शोकं सहृदतयाऽसह्यमान सहसा व्याधं शशाप-

**मा निषाद!प्रतिष्ठां त्वमगम: शाश्वती: समा।**

**यत् क्रौञ्चमिथुनादेकमवधी: काममोहितम्।।**[11]

तदेव लौकिकसाहित्यस्यादिभूतं अनुष्टुब्छन्दबद्धं सहसा स्फुरितं काव्यरत्न कवितारूपेण बहिरागत:। सोऽयं प्रतीयमानार्थरूप: करुणरसस्य स्थायिभावश्श्लोक:।

तदेव ध्वनिकारेण प्रथममेवोक्तम् प्रतीयमानमित्यादिना-

**प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम्।**

**यत्तत् प्रसिद्धावयवातिरिक्तं विभाति लावण्यमिवाङ्गनासु।।[12]**

कर्मव्युत्पत्त्यानुसारेण ध्वन्यते यः सः ध्वनिरिति ध्वनिपदाभिधेयो व्यङ्ग्यार्थ:काव्यस्यात्मा इति ध्वनिकाराभिप्रायेण सिद्धम्। अयमेव सिद्धान्तश्चापि।

**तत्र ध्वनिः द्विविधः-**

एकः लक्षणामूलः,अपरः अभिधामूलः। तत्र विवक्षिताविवक्षितादि नैकैः भेदोपभेदाः सन्तीति।

**शब्दशास्त्रदृष्ट्याध्वनिविमर्शः** 'ध्वनिः' शब्दस्य प्रयोगः महाभाष्यकारः शब्दानुशासनमिति उपदेशप्रसङे पस्पशान्हिके 'कस्तर्हि शब्दः?' इति प्रश्नोत्तरपक्षं समादधति–

**"प्रतीतपदार्थको ध्वनिः शब्द इत्युच्यते। तद्यथा -शब्दं कुरु,मा शब्दं कार्षीः। शब्दकार्ययं माणवकः इति ध्वनिकुर्वन्नेवमुच्यते। तस्माद् ध्वनिः शब्दः।[13]**

*वैय्याकरणनये ध्वनिप्रकारः*

तत्र तावच्छब्दो द्विविधः स्फोटो ध्वनिश्च[14]।ध्वनिरपि द्विविधः प्राकृतो वैकृतश्च।तत्र प्राकृतो नाम येन विनाऽभिव्यक्तं स्फोटस्वरूपं न परिच्छिद्यते। विकृत एव वैकृत इति प्रज्ञादित्वात् स्वार्थेऽण् प्रत्ययः।प्राकृतेन ध्वनिनाऽस्फोटरूपं येन ध्वनिना प्रचितप्रचिततरं कालं पुनः पुनरविच्छेदेनोपलभ्यते स वैकृतः।यावदयं ध्वनिर्नोपरमति तावदुपलभ्यते स्फोट इति हि स्थितिः। तदुक्तम्–

**शब्दस्यग्रहणे हेतुः प्राकृतो ध्वनिरिष्यते।**

**वृत्तिभेदे निमित्तत्वं वैकृतः प्रतिपद्यते।।**

प्राकृतध्वनिं विना स्फोटः सामान्यरूपेण विशेषरूपेण वा न भासते।अयमेव ह्रस्वदीर्घप्लुतादिव्यवहारहेतुरिति प्राकृतध्वनिगतकालभेदः प्राकृतध्वन्यभिन्नत्वेन स्फोटे प्रतीयते। वैकृतध्वनिस्तु प्राकृतध्वनिप्रतीतं स्फोटमुत्तरकालं स एवायमित्यनेन चिरकालमुपलम्भयति।वैकृतध्वनिभिः स्फोटो न भिद्यते।

तदुक्तम्–

**शब्दस्योर्ध्वमिभिव्यक्तेर्वृत्तिभेदे तु वैकृताः।**

**ध्वनयः समुपोहन्ते स्फोटात्मा तैर्न भिद्यते।।[15]**

तिसृषु वृत्तिषु समुपोहन्ते कारणानि भवन्ति,स्फोटस्तु तैर्न भिद्यत इति तदर्थः।

अनयोर्ध्वन्योः शब्दोत्पत्तेः प्राग्यानि कम्पनानि भवन्ति,तानि प्राकृतध्वनेःभवन्ति,भवन्ति च शब्दोत्पत्तेः पश्चाद्यान्यनुरणनानि,तानि वैकृतध्वनेरिति विद्वद्भिर्विभावनीयम्।

यथा– केनचित् घटमानयेति वैखरीनादः प्रयुक्तः, सः केनचिच्छ्रोत्रेन्द्रियेण गृहीतः स नाद इन्द्रियद्वारा बुद्धिहृद्गतस्सन्नर्थकबोधकं शब्दं स्वनिष्ठकत्वादिना व्यञ्जयति तस्मादर्थबोधः। स्फुटत्यर्थोऽस्मादिति व्युत्पत्या स्फोटः।

उच्चारयितुस्तु युगपदेव मध्यमावैखरीभ्यां नाद उत्पद्यते।तत्र वैखरीनादो वह्नेः पूत्कारादिवन्मध्यमानादोत्साहकः मध्यमानादस्फोटं व्यञ्जयतीति शीघ्रमेव ततोऽर्थबोधः। परस्य विलम्भेनानुभवसिद्धत्वात्।अतएव **श्रोत्रोपलब्धिबुद्धिर्निर्ग्राह्यः प्रयोगेणाभिज्वलितः आकाशदेशः शब्दः**।।[16]

*<u>**स्फोटध्वन्योः सम्बन्धः**</u>* ध्वनिः सफोटाभिव्यक्तौ निमित्तः।

*यथोक्तं-*

**द्वावुपादान शब्देषु शब्दौ शब्दविदोविदुः।**

**एको निमित्तः शब्दानामपरेऽर्थे प्रयुज्यते।।**[17]

अभिव्यक्तिवादिनः इत्थं प्राह-

**इन्द्रियस्यैव संस्कारः शब्दस्यैवोभयस्य च।**

**क्रियते ध्वनिभिर्वादास्त्रयोभिव्यक्तिवादिनाम्।।**[18]

अत्र त्रयवादाः इत्थं विद्वद्भिः क्रियते-

- ध्वनिभिः इन्द्रियस्यैव नाम श्रवणेन्द्रियस्य संस्कारः क्रियते येन कर्णेन्द्रियः शब्दग्रहणयोग्यतां दधाति स्फोटः अभिव्यक्तश्च भवतीति प्रथमं मतम्।
- ध्वनिभिः शब्दस्यैव संस्कारः क्रियते येन शब्दस्य ग्राह्यत्वशक्तिः उद्बुद्धा भवति।स च शब्दः इन्द्रियग्राह्यः भवतीति द्वितीयं मतम्।
- ध्वनिभिः शब्दस्य इन्द्रियस्य च उभयोः संस्कारः क्रियते यथा चक्षुषा रूपग्रहणे तेजसा द्वयोरपि संस्कारः क्रियते इति तृतीयं मतम्।

ध्वनेः ग्रहणविषयेऽपि वाक्यपदीयकारः इत्थं प्रोवाच-

**स्फोटरूपाविभागेन ध्वनिर्ग्रहणमिष्यते।**

**कैश्चित् ध्वनिरसंवेद्यःस्वतन्त्रोऽन्यैःप्रकल्पितः।।**[19]

अर्थात्

1.स्फोटस्वरूपात् अविभागेन

2.ध्वनिः स्फोटस्य उपलब्धौ असंवेद्यः

3.ध्वनिः स्फोटस्य उपलब्धौ स्वतन्त्रः

शब्दानित्यत्ववादिनां मते स्फोटनादयोः स्वरूपम्

**यः संयोगविभागाभ्यां करणैरुपजन्यते।**

**सःस्फोटःशब्दजाः शब्दा ध्वनयोऽन्यैरुदाहृताः।।**

वैयाकरणनये य:प्राकृत: स:तार्किकमते स्फोट:,यश्च वैकृत:स तर्के ध्वनि:उच्यते। तदेवं तार्किकानुसारं स्फोटध्वन्यो: जन्यजनकभाव सम्बन्ध:। जन्यो ध्वनि:,जनकश्च स्फोट:।[20]

***स्फोटवाद:***

शब्दशास्रे नैकेषु सिद्धान्तेष्वन्यतम: सिद्धान्त: भाषाविज्ञानस्य चोद्धारक: मूलसिद्धान्त: स्फोटायनाचार्येण[21] प्रवर्तित:स्फोटवाद:।

*स्फोटस्वरूपम्*

- स्फुट्यते ध्वनिना अभिव्यज्यते इति कर्मव्युत्पत्त्या स्फोट:।
- स्फुटत्यर्थोऽनेनेति करणव्युत्पत्त्या च घञन्त: स्फोटशब्द: निष्पद्यते।
- ध्वनिव्यङ्ग्यत्वे सति अर्थविषयकबोधजनकत्वं स्फोट:।
- वर्णातिरिक्तो वर्णाभिव्यङ्ग्योऽर्थप्रत्यायको नित्य: शब्द: स्फोट:। अर्थात् यद्बलादर्थप्रतीति: स: स्फोट:।

**अयं स्फोट: अष्टविध:-**

अष्टविधस्फोटात्मको शब्दो वृत्याश्रय:।तत्र वर्णपदवाक्यभेदेन स्फोटस्त्रिधा। तत्रापि जातिव्यक्तिभेदेन पुन:षोढा। अखण्डपदस्फोटोऽखण्डवाक्यस्फोटश्चेति संकलनयाऽष्टौ स्फोटा:।[22]

तथा हि-

1.वर्णस्फोट:

2.पदस्फोट:

3.वाक्यस्फोट:

4.वर्णजातिस्फोट:

5.पदजातिस्फोट:

6.वाक्यजातिस्फोट:

7.अखण्डपदस्फोट:

8.अखण्डवाक्यस्फोट:

एतेषु वाक्यस्फोटो मुख्य:,**तस्यैव लोकेऽर्थबोधकत्वात्तेनैवार्थसमाप्तश्चेति।** तदाह न्यायभाष्यकार:-

**पदसमूहो वाक्यामर्थसमाप्तौ इति।**[23]

स्फोटस्याखण्डत्वपक्षमाह हरि:-

**पदे न वर्णा विद्यन्ते वर्णेष्ववयवा न च।**

**वाक्यात्पदानामत्यन्तं प्रविवेको न श्चन।।**[24]

**वाणीभेद:** -

कोऽयं स्फोट: इति जिज्ञासायामुच्यते- चतुर्विधा[25] हि वागस्ति।

1.परा

2.पश्यन्ती

3.मध्यमा

4.वैखरी

**परावाङ्मूलचक्रस्था पश्यन्ती नाभिसंस्थिता।**

**हृदिस्था मध्यमा ज्ञेया वैखरी कण्ठदेशगा।।**

**वैखर्या हि कृतो नादः परश्रवणगोचरः।**

**मध्यमया कृतो नादः स्फोटव्यञ्जक उच्यते।।**

**परा**–

पवनसंस्कारीभूता मूलाधारस्था शब्दब्रह्मरूपा स्पन्दशून्या बिन्दुरूपिणी परा वागुच्यते।

**पश्यन्ती**– ततः नाभिपर्यन्तमागच्छता तेन वायुनाभिव्यक्ता मनोगोचरीभूता पश्यन्ती वागुच्यते।

**मध्यमा** – ततो हृदयपर्यन्तमागच्छता तेन वायुनाभिव्यक्ता तत्तदर्थवाचकस्फोटरूपा श्रोतग्रहणयोग्यत्वेन सूक्ष्मजपादौ बुद्धिनिर्गाह्या मध्यमा वागुच्यते।

**वैखरी** –तत आस्यपर्यन्तमागच्छता तेन वायुनोर्ध्वमाक्रामता च मूर्धानमाहत्य परावृत्य च ततस्थानेष्वभिव्यक्ता परश्रोत्रेणापि ग्राह्या वैखरी वागुच्यते। एवं रीत्या व्याकरणशास्त्रे साहित्यशास्त्रे च ध्वनिसिद्धान्तः प्रतिपादितः। उभयोः प्रयोजनं तु धर्मार्थकाममोक्षेति चतुर्विध पुरुषार्थः प्राप्तिः आनन्दप्राप्तिः ब्रह्मानन्दावाप्तिश्च।

**सन्दर्भाः-**


1. ध्वन्यालोकः,आचार्य विश्वेश्वरः,ज्ञानमण्डल लिमिटेड,वाराणसी
2. वाक्यपदीयम्,
3. वाक्यपदीयम्,1.14
4. उणादिकोषः, 4.140
5. साहित्यदर्पणः, 4.23,व्याख्याकारः–शालिग्राम,प्रकाशनम्,मोतीलाल बनारसीदास
6. ध्वन्यालोकः,1 कारिका– 13
7. काव्यप्रकाशः, कारिका–4,आचार्य विश्वेश्वरः
8. रसगङ्गाधरः, 1 सूत्रम्–2
9. ध्वन्यालोकः,कारिका–5
10. ध्वन्यालोकः, 1 कारिका–5
11. वाल्मीकिरामायणम्,1.1
12. ध्वन्यालोकः,प्रथम.कारिका.4

13. महाभाष्यम्,पस्पशाह्निके
14. वैयाकरणसिद्धान्तदिग्दर्शनम्,डॉ.बोधकुमारझा:
15. वाक्यपदीयम्,कारिका 1.77
16. वर्णोच्चारणशिक्षा
17. वाक्यपदीयम्,ब्रह्मकाण्डम्, का.43
18. वाक्यपदीयम्, ब्रह्म.का.78
19. वाक्यपदीयम्,ब्रह्म.का.80
20. वैयाकरणसिद्धान्तदिग्दर्शनम्
21. अष्टाध्यायी,6.1.123
22. परमलघुमञ्जूषा,प्रो.बोधकुमार झा
23. तदेव
24. वाक्यपदीयम्,ब्रह्म.का.73
25. वैयाकरणसिद्धान्तदिग्दर्शनम्

**अन्यसहायकग्रन्थबेबसाइटपत्रपत्रिकासूची-**

1. पाणिनीय शब्दानुशासनम्,सम्पादक:–सत्यानन्द:वेदवागीश:
2. विद्यारश्मि:,राष्ट्रियसंस्कृतसंस्थानम्,मुम्बई
3. वैयाकरणभूषणसार:,बालकृष्ण पंचोली
4. Sanskrit.nic.in